राँचीविश्वविद्यालयस्य पी-एच० डी० (संस्कृतम्)

उपाधिप्राप्तये प्रस्तावितं शोधप्रारूपम्

# “भारतीयसाहित्ये आख्यायिकायाः समीक्षात्मकमध्ययनम्”


स्नातकोत्तरसंस्कृतविभागः

राँचीविश्विद्यालयः, राँची

**शोधनिर्देशकः**

**डॉ० श्रीप्रकाश सिंहः**

सहायकप्राध्यापकः

संस्कृतविभागः

राँची विश्वविद्यालय, राँची

**शोधार्थी**

**पूजा गोल**

# भारतीयसाहित्ये आख्यायिकायाः – समीक्षात्मकमध्ययनम्

## भूमिका –

भारतीयसाहित्यं विश्वस्य प्राचीनतं साहित्यं वर्तते। अस्मिन् सहस्राब्दितः साहित्यरचना भवितुमर्हति। अनेन कारणेन भारतीयसाहित्यस्य परिदृश्यम् अतीव विशालम्। विश्वस्य सर्वसाहित्ये भारतीयसाहित्यस्य समृद्धतमं स्वरूपं प्राप्यते। भारतीयसाहित्यस्य प्राचीनतायाः साक्ष्यं वेदानां रूपे समुलभ्यते, यत् ईसा पूर्वं पञ्चसहस्राधिकवर्षेभ्यः प्राचीनमस्ति यानि च विश्वमानवस्य प्रथमं काव्यं कथ्यते स्म। चतुर्वेदानाम् अनन्तरं ब्राह्मण-आरण्यक-उपनिषद्साहित्यानां, वेदाङ्गसाहित्यस्यादीनां निर्माणमभवत्, यत् मानवजीवनाय आवश्यकं ज्ञान-कर्म-पुरुषार्थचतुष्टैश्च परिपूर्णोऽस्ति। एषामनन्तरं बाल्मीकिकृतं रामायणं, व्यासकृतं महाभारतम्, पुराणसाहित्यस्य च रचना सम्भूता, याभिः अद्यापि भारतीयसाहित्यं समुल्लसितोऽस्ति। एतान्यतिरिक्तं पाणिनि-कात्यायन-पतञ्जलीनां सदृशानां त्रिमुनीनां व्याकरणशास्त्रं, चाणक्यकृतम् अर्थशास्त्रं, चरकसुश्रुतादीनाम् आयुर्वेदग्रन्थानि, विभिन्नानि च दार्शिनिकग्रन्थान्यपि भारतीयसाहित्यं समृद्धञ्चक्रुः।

पूर्वाचार्यैरुल्लिखातासु गद्यपद्यविधासु इतिहाससम्मते कथानके आधारिता आख्यायिका विधाऽपि प्राचीनकालात् वर्तमानपर्यन्तं भारतीयसाहित्ये प्रचलिताऽस्ति।

## शोधसमस्या -

साहित्ये विद्यमानानाम् आख्यायिकानाम् विषयम् आलोच्यते चेत् भारतीय साहित्ये आख्यायिकानामपि उन्मोचनं भवेत्। अतः उक्त समस्यायाः समाधानहेतु शोधाध्ययनस्य विषयः "भारतीय साहित्ये आख्यायिकायाः समीक्षात्मकम् अध्ययनम् इति स्वीकृतः।

## शोध परिकल्पना -

प्राक्कल्पना शोधस्थ एकम् आधारभूतं तत्वं भवति। भारतीय साहित्ये अन्तर्गतायाम् आख्यायिकायाः विषयं वर्तमान समये प्रासङ्गिकतायाः समन्वयः वर्तते।इति प्रस्तुतस्य शोधविषयस्य प्राक्कल्पना वर्तते। अयं विचारः अनुसन्धान दृष्ट्या शोधप्रवन्धे प्रमाणी क्रियते।

## आख्यायिकायाः परिचयः –

अस्यां पृथिव्यां मानवसभ्यतायाः आरम्भकालादेव लब्धप्रसवं कविप्रतिभाया अमृतमयं फलं भवति साहित्यम्। कारणं हि साहित्यं मानवस्य प्रतिफलनं दर्पणं वा। कविवाङ्मयसृष्ट्यात्मकस्य तस्य साहित्यस्य रूपद्वयं वर्तते। यत्तस्य सार्वजनीनम् अतीवान्तरं रूपं तत्तु प्रायेणापरिवर्तितमेवास्ति। यत् पुनः सामयिकं किञ्चिदिव बहिरङ्गतम्, रूपं तदेव समये समये प्रदेशे प्रदेशे च विवर्तते। सामाजिकी स्थितिः शिक्षाभ्यासंस्कारादिजन्या कवेर्मानसिकी प्रवृत्तिः साहित्यिकानन्दम् उत्पादयितुम् अलम्। एतेन सहृदयानां मानसिकरुचिरपि अभिव्यक्ता भवति। तामेव स्थितिमनुरुन्धाना संस्कृतवाङ्मये प्रवहन्ती साहित्याधारापि कदाचिन्नैकरूपः परिप्राप्यते।

आख्यायिका हि सभ्यतायाः संस्कृतिः, तदभावे च सभ्यताया विनाशो भवेत्। किन्तु तन्न भवेत् भारतवर्षेऽस्मिन्। भारते आख्यायिकायाः भाण्डारः अनन्तः। आख्यायिका साधारणतया केवलं बालकानां कृते इति तु न ध्रुवम्, परं समेषां साधारणजनानां कृतेऽपि आदरणीयाः भवन्ति। गम्भीरविषयान्विबोधयितुं सारल्येनोपस्थापयितुं चास्माभिराख्यानमाश्रियन्ते। अवान्तरप्रयोजननान्यन्यानि सन्त्यपि मनोविनोदनमेव आख्यायिकायाः मुलमुद्देश्यम्। संस्कृतेतरसाहित्ये अपि प्राचुर्येण आख्यायिकाप्रपञ्चमस्ति।

ऐतिहासिक-कथा-सम्बद्धा, नायकोऽत्र वक्ता, उच्छासादिषु विभक्ता, वक्रापरवक्रपद्यसंयुक्ता, संस्कृतनिष्ठा, स्वल्पपद्यान्विता, स्वचिरतपरकविचरित्तदिसंयुक्ता च। हर्षचरितम् इति उत्तमाख्यायिकायाः निदर्शनम्।

संस्कृतसाहित्यं सुप्राचीनं प्रथागतसाहित्यम्। अत्र नास्ति नूतनत्वम्, सृजनशीलता अत्र अकल्पनीया एव इति धारणास्ति जनमनसि। अस्य कारणं भवति विविधाः संस्कृतकृतयः। ऋग्वेदाद् ध्रूपदिसाहित्यमतिक्रम्य वर्तमाने ऊनविंशशतके अपि अधिका रचना प्रथागतसीमा न लङ्घिता। अत्र स्मरणीयं विविधानां आख्यायिककाव्यानां बीजं निहितमस्ति वेदे। वैदिकयज्ञसम्बन्धिनां वीरत्वव्यञ्जकमाहात्म्यकीर्तनात्मानाम् आख्यानोपाख्यानामाधारो भवति

वैदिकधर्मः। सुप्राचीनकालादारभ्य वेदोपनिषत्सु विविधाः आख्यायिकाः परिप्राप्यन्ते अस्माभिः। यथा वेदे याज्ञवल्क्यमैत्रेयी-आख्यानम्, यमनचिकेताख्यानञ्चेत्यादि।

**शोधोदेश्यम् –**

साहित्यं समाजस्य दर्पण: भवति। वैदिककालादेव मानव समुदायस्य रुचि: साहित्ये वर्त्तते।साहित्यविषयं यावदालोच्यते तस्मिन् विषये स्पष्टता तावत् भवति। आख्यायिका विषये सर्वेषां रुचिः वर्त्तते। संस्कृतबाङ्ग्ये वैदिकसाहित्यात् आधुनिकसाहित्यं पर्यन्तम् आख्यायिका विषये बहु अध्ययनं न कृतम्। वैदिकवाङ्ग्ये चर्चा अभवत्, वैदिकोत्तर वाङ्ग्ये अपि चर्चा अभवत्

अपि तु लौकिक वाङ्ग्ये आधुनिक वाङ्ग्ये च आलोचना अभवत् । परन्तु आख्यायिकाया: विषये विशिष्टं किमपि नास्ति। अहमत्र वैदिक साहित्यात् आधुनिकसाहित्य पर्यन्तं आख्यायिकायाः महत्वम्, आख्यायिकायाः आलोचना कृत्वा किं किं आख्यायिकाः उपलब्धमिति चर्चा कर्तुमिच्छामि। न मात्रम् आशासे अपि तु पूर्णविश्वासेन, यत् अयस्कानां वयस्कानां वालानां तरुणानां किशोराणां प्रौढादीनां सर्वस्तरीयाणां पाठकवृन्दानां कृते प्रवन्धः अयं सुवोध्यः रुचिकरः मनोनीतः च सेत्स्यति। आख्यायिकायाः विषयं सीकृत्य पठतांछात्राणां आख्यायिकाविषये ज्ञास्यन्ति। मया अस्मिन शोधप्रवन्धे आख्यायिका वर्तमान समये प्रासङ्गिकतायाः आलोचना करिष्यते । तेन न केवलं सुधीजनाः अपि तु साधारणछात्रा: सामान्य पाठकाश्च अपि लाभान्विता: भविष्यन्ति। नवीनसंस्कृतप्रियजनाः आख्यायिकाविषये परिचिताः भवेयुः इति। अस्य शोधस्य उद्देश्यः भवति।

**वैदिकवाङ्ग्ये आख्यायिका –**

भारते उपलभ्यमानेषु साहित्येषु प्राचीनाः वेदाः। आर्षसंस्कारस्य प्रमाणलेख्याः इमे ग्रन्थाः। अतः ऋषीणाम् आख्ययिकया प्रकाशिता वेदाः। तत्र प्राचीनो भवति ऋग्वेदः। आख्यायिकाः उपलभ्यन्ते ऋग्वेदे –

**‘तवाहं शूर रातिभिः प्रत्यायं सिन्दुमावदन्**

**उपातिष्ठन्त गिर्वणो विदुष्टे तस्य कारवः।।'**[1]

अन्यत्र आख्यायिकाः भवन्ति –

**'नराशंस सुधष्टममपश्यं सप्रथस्तमम्।**

**दिवोन सद्ममखसम्।।**

**यज्ञं पृच्छाम्यवमं स तद् दूतो वि वोचति.... ।'**[2]

संहितासु आख्यायिकायाः प्रयोगः दृश्यते। परन्तु अत्र आख्यानसमानार्थीना कथाशब्देन बहुलप्रयोगः दृश्यते।

1. कथा यजमानो यजमानेन मातृव्येन संहऽऽसोत्सहं वेद।[3]

2. यत् समावद्विदकथा त्वममनिभजोजनोनाहम्।[4]

3. ते ब्रूवनना नरशमनीथा कथा नरशमनोष इति।[5]

4. कथा न क्षोणीभिर्यसा सभारत।[6]

भारतीयाख्यायिकायाः इतिहासे ऋग्वेदस्य संवादसूक्तानां महत्त्वमधिकमस्ति। पुरुरवा-उर्वश्यादिसंवादसूक्तेषु पर्याख्यायिकायाः वर्णनं विद्यते। उर्वशी मतिमानुषी योनिः अस्ति, पुरुरवसं परित्यज्य गच्छति सा। इयं प्रागैतिहारिकाख्यायिका इति वक्तुं शक्यते।

उपनिषत्सु आख्यायिकायाः वर्णनं तु उद्देश्यपूर्णमस्ति। यथा –

---

[1] ऋग्वेदे, 1.11.6 (मण्डल-सूक्त-मन्त्रक्रमेण)

[2] तत्रैव, 1.08.9, 1.105.4

[3] मैत्रायणी संहिता, 1.4.22

[4] तैत्तरीयसंहिता, 2.5.84

[5] काठकसंहिता, 10.7

[6] ऋग्वेदसंहिता, 1.45.1

**'तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायामवा इति।'**[7] अन्यत्र जबालापुत्रसत्यकामस्य ऋषभेण, हंसेन, मद्गुणा च उपदेशः प्राप्यते।[8] बृहदारण्यकोपनिषदि देवासुरसंग्रामाख्यायिका वर्तते।[9]

**वैदिकोत्तरवाङ्मये आख्यायिकाः –**

वाल्मीकीये रामायणे कविवाल्मीकिः, आख्यायिकासम्बन्धकार्यं प्रायः सर्वेस्मिन् काण्डे किञ्चित् किञ्चित् वक्ति। यथा बालकाण्डे अन्धमुनिकर्तृकशापप्रदानाद्याख्यायिकाः। किष्किन्धाकाण्डे वर्षावर्णादिकथनम्, सुन्दरकाण्डे सुरसासापिन्याः उद्धारः, युद्धकाण्डे अकम्पन-प्रहस्त-धुम्रलोचन-वज्रदंष्ट्रादिराक्षसवधाद्याख्यायिकाः चेत्यादिविषयाः दृष्टाः। रामायणे सर्वाधिकाः आख्यायिकाः बालकाण्डे उत्तरकाण्डे च वर्तन्ते। वामनावताराख्यायिका, राज्ञः सागरस्य आख्यायिका, समुद्रमन्थनस्य आख्यायिका, शुनःशेपाख्यायिका (बालकाण्डे), श्रवणस्य आख्यायिका (अयोध्याकाण्डे), हनुमतः आख्यायिका (किष्किन्धा काण्ड) च इत्यादयः। रामायणीयाख्यायिकाः तु मानवीयमूल्यानां प्रतिस्थापनं करोति। आख्यायिकाः मनोह्लादरसपरिपूर्णाः भवन्ति अतः अत्र पाठकान् आकर्षयतन्ति।

आख्यायिकदृष्ट्या मूल्याङ्कनेन अवगम्यते यत् महाभारतं सर्वविधाख्यायिकानाम् अद्भुतं समागमं वर्तते। वेदोत्तराख्यायिकायां पात्रशैल्युद्देश्यादिदृष्ट्या यावन्तः भेदाः भवितुम् अर्हन्ति, तावन्तः प्रकाराः महाभारते अवश्यं प्राप्यन्ते। यथा – शकुन्तलोपाख्यानम् (आदिपर्व), पृथुभरतयोः आख्यायिका (उद्योगपर्व), शिव्युपाख्यानम्, सावित्र्युपाख्यानम्, नलोपाख्यानम् (वनपर्व), हंसकाकाख्यानम् (शल्यपर्व), स्वयंभूमन्व्योः आख्यायिका, परशुरामस्य आख्यायिका (शान्तिपर्व), विश्वमित्रजन्माख्यायिका (अनुशासनपर्व) च प्रभृतयः। महाभारतं धर्मस्य संस्कृतेश्च परिचायकं वर्तते। महाभारते आख्यायिकानां बाहुल्यमिदमभिमतं पोषयति यत् महाभारतीयकाले आख्यायिकायाः महत्त्वपूर्णं स्थानमासीत्।[10]। महाभारते व्यासः स्वपरम्परायाः वंशचरितानुकथनेन आख्यायिकां कथयति। कदाचित फणितात्मकथा इत्यपि विशेषणयुक्ता च अत्र कथा विद्यते। किन्तु अत्र उभयोः रामायणमहाभारतयोः आख्यायशैली काचित् वर्तते।

---

[7] छान्दोग्योपनिषद् – 1.12.2

[8] तत्रैव, 4.5.8

[9] बृहदारण्यकोपनिषद् – 1.3

[10] विंशतिशताब्दौ संस्कृताख्यायिकाः, पृ. 3

एवमेव आख्यायिकावर्णनशैली वयम् आधुनिकाख्यायिकां च दृश्यते। भारतीयसाहित्ये आख्यायिकायाः विकासः लक्षणीयः अस्ति।

आख्यायिकापरम्परादृष्टौ पुराणस्य महत्वपूर्णं स्थानं वर्तते। पौराणिकाख्यायिकानां केन्द्रस्थलं भवति धर्मः। धार्मिकदृष्ट्या निर्मिताः पौराणिकाख्यायिकाः पूर्णतया लौकिकव्यवहारज्ञानं कारयति। समाजे शान्तिप्रदायिकाः स्थिरताप्रदायिकाः बहव्यः आख्यायिकाः पुराणेषु सन्ति, यतः दानं, दया, मैत्री, त्यागः, करूणा, सत्याचरणं, सरलता, परोपकारः, साहसश्चैते विषयाः ज्ञायन्ते। काश्चन पौराणिकाख्यायिकाः सन्ति यथा – ययातिशर्मिष्ठायाः देवयान्याश्च आख्यायिका (मत्स्यपुराणम्), जमदग्नेः विश्वामित्रस्य च उत्पत्याख्यायिका (विष्णुपुराणम्), दधीच्याख्यायिका (लिंगपुराणम्), वामनावतारः, राजाशिवेः आख्यायिका (पद्मपुराणम्) च प्रभृतयः। पुराणेषु प्राप्तायाः आख्यायिकाः मुख्यम् उद्देश्यं परोपकारः इति। आख्यायिकाः अस्मान् बोधयन्ति यत् परोपकारः पुण्याय भवति, परपीडनं पापाय भवति। पुराणेषु वर्णिताः कथाः अद्यत्वे मानवजीवनदृष्ट्या पूर्णतया ज्ञानविज्ञानप्रदायिन्याः भवन्ति।

**लौकिकवाङ्मये आख्यायिका –**

वैदिककालानन्तरं भारतीयसाहित्ये लौकिकः युगः प्रारभ्यते। कालिदासः, अश्वघोषः, भारविः, माघः, भवभूतिः, श्रीहर्षः प्रभृतिसदृशाः महाकवयः विभिन्नासु-विधासूपविधासु रचना कृत्वा भारतीयसाहित्यं देदीप्यमानं चक्रुः। एते ईदृशी अविरला धारा प्रवाहिता या अद्यापि सततप्रवाहमानाऽस्ति। आधुनिकाः संस्कृतरचनाकारः अद्यापि तां परिपाटीं समृद्धयन्तः नित्यं नवप्रयोगान् कुर्वन्ति। इत्थं रूपेण वयं पश्यामः यत् भारतीयसाहित्यस्य परिदृश्यमतीवं विशालमस्ति।

भारतीयज्ञानपरम्परायां काव्यशास्त्रमेका विशिष्टा विधा वर्तते। भारतीयज्ञानपरम्परायां काव्यलक्षणानि शास्त्ररूपेण निबन्धनस्य कार्यं विशिष्टत्वेन संस्कृतभाषायामेव अभूत्। प्रत्येकं कविः प्रयोगधर्मी भवति। अतः एव कथानकं शैलीं च गृहीत्वापि नूतनां रचनां रचयति। संस्कृतकाव्यं लोकेन शास्त्रेण च समन्वयं कृत्वा काव्यसृष्टिं तस्य प्रवर्धनञ्च विवेचयति। आत्मा, परमात्मा, देवता, ज्ञानी, साधुः, कविरित्येते शब्दाः लोके शास्त्रे चोभयोः समानरूपेण प्रयुक्ताः भवन्ति। लोके न केवलं संस्कृते अपि तु अन्यास्वपि भाषासु साहित्यं विरच्यते। संस्कृतसाहित्यन्तु प्रायः नेतृत्वं प्रददात्येव।भाषास्तु काव्याभिव्यक्तिमाध्यामा एव सन्ति। शब्दार्थौ काव्यस्य शरीरम्। एतेन कारणेन भारतीयसाहित्ये भाषाः

काव्याङ्गरूपेण वर्णिताः। काव्ये संस्कृतं प्रधानम् अथवा सर्वभाषाप्रतिनिधिरिति प्रख्यापितम्। काव्ये मूलतत्त्वानि वर्तन्ते। अतः संस्कृतकाव्यं भारतीयकाव्यस्य आदर्शमिति वचने न कापि हानिः।

**1.काव्यसाहित्यम्** – यथा - बुद्धचरितम्, सौन्दरनन्दनम्, कुमारसम्भवम्, रघुवंशम्, किरातार्जुनीयम्, जानकीहरणम्, शिशुपालवधम्, भट्टिकाव्यम्, हरविजयम्, नैषधीयचरितं चेत्यादीनि।

2.**नाट्यसाहित्यम्** – यथा – शारिपुत्रप्रकरणम्, प्रतिमा, अभिषेकनाटकम्, दूतवाक्यम्, ऊरुभङ्गम्, पञ्चरात्रम्, बालचरितम्, स्वप्नवासवदत्तम्, अभिज्ञानशाकुन्तलम्, मृच्छकटिकम्, रत्नावली, उत्तररामचरितम्, वेणीसंहारं चेत्याद।

3.**गीतिकाव्यम्** – यथा – गन्डीस्तोत्रगाथा, ऋतुसंहारम्, मेघदूतम्, घटकर्परकाव्यम्, शतकत्रयम्, चन्डीशतकम्, गीतगोविन्दं चेत्यादीनि।

**4.गद्यकाव्यम्** – यथा – दशकुमारचरितम्, वासवदत्ता, हर्षचरितम्, तिलकमञ्जरीं चेत्यादीनि।

**5.चम्पूकाव्यम्** – यथा – नलचम्पू, मदालसाचम्पू, रामायणचम्पू, यशस्तिलकम्, भागवतचम्पू, जीवन्धरचम्पू चेत्यादीनि।

**आख्यायिकायाः वैशिष्ठ्यम् समीक्षात्मकमध्ययनम् च -** संस्कृतसाहित्यस्य आत्मा भवति कथा आख्यायिका वा। अतः वेदादारभ्य उपनिषद्यावत् कथायाः व्यवहारः दृश्यते। आख्याकग्रन्थेष्वपि कथा शब्दस्य प्रयोगः वर्तते। परन्तु अव्ययकथया सह सुबन्तस्य प्रयोगः प्राप्यते। उच्यते –

‘यथा उपपुराणों नामपीते कक्षोदके पूर्वाह्ने न सम्मिनासु छायास्व-पराह्ने नाध्यूहके मेयेऽपतौ वर्षे त्रिरात्रवैदिके स्वाध्याये नान्तरियान्तस्मिन् कथावेदेतेनास्य रात्रौ च न च कीर्तियिषेत।’[11] सायणाचार्येणापि भाष्यभूमिकायामुक्तं – कथा न वदेत् लौकिकी वार्ता न कूर्यादिति। सायणवाक्येन इदं स्पष्टं भवति यत् कथाशब्दः लौकिकवार्तायाः वाचकः, एवञ्च आख्यायिका अपि लौकिकवार्तायाः वाचको भवति। अतः एवं वक्तुं शक्यते यत् वैदिकसाहित्ये आख्यानार्थे कथाशब्दस्य प्रयोगः प्राप्यते।

[11] ऐतरेयारण्यकम् – 5.3.3

चराचराः इति विभक्तेः जीवगणे अचरजीवाः वृक्षाः उद्भिजाः भवन्ति। चराः तु प्राणिनः पक्षिणः कीटाः सन्ति। ते जरायुजाः, स्वेदजाः, अण्डजाः च। एतेषु प्राणिषु मानवः बुद्धिमान् जीवी इति ज्ञातोऽयं विषयः। तस्य विवेचनाशक्तिः इतरप्राणिभ्यः मनुष्यमुत्तमं कृता। किं, कदा, कथं वा कर्तव्यमिति विवेचनम्, अनुशासनं, क्रमपालनं, सामाजिकजीवनं च इत्यादयः गुणाः मनुष्यस्य एव सन्ति। कर्तव्याकर्तव्येति विचारिते सति नीतिकथाः, नीतिश्लोकाः च दरीदृश्यन्ते। मानवः इतरेभ्यः कष्टं न यच्छेत्, आनन्दमेव यच्छेत्, स्वयं च सुखी भवेदिति नीतिश्लोकानामाशयः। एवं अनेकाः नीतिकथाः संस्कृतवाङ्मये दृश्यन्ते। नीतिकथासाहित्यं चतुर्थभागेषु विभक्तमस्ति – (क.) अद्भुतकथा, (ख.) लोककथा, (ग.) कल्पितकथा, (घ.) पशुकथा। व्यावहारिकदृष्टिकोणेन संस्कृतसाहित्यं भागद्वये विभक्तमस्ति – (क.) नीतिकथा, (ख.) लोककथा। पंचतन्त्रं हितोपदेशश्चेत्यादयः नीतिकथाः संस्कृतवाङ्मये दृश्यन्ते।

**शोधप्रविधिः कार्यप्रणाली च :-**

प्रस्तुते अस्मिन् शोधे वर्णनात्मीका, विवेचनात्मीका,समीक्षात्मीका,अन्वेषणात्मीका साध्याययुक्ता चेति प्रभृतयः प्रविधयः प्रयुक्ताः भविष्यन्ति।

**अध्यायविभाजनम् -**

**भूमिका**

**प्रथमोऽध्यायः**- आख्यायिकायाः परिचयः

**द्वितीयोऽध्यायः**- वैदिकवाङ्मये आख्यायिका

1.ऋग्वेद

2.मैत्रायणी संहिता

3.तैत्तिरीय संहिता

4.वृहदारण्यकोपनिषद्

**तृतीयऽअध्यायः**- वैदिकोत्तरवाङ्मये आख्यायिका

1.रामायण

2.महाभारत

3.पुराण

**चतुर्थोऽध्यायः**- लौकिकवाङ्मये आख्यायिका

1.काव्यसाहित्यम्

2.नाट्यसाहित्यम्

3. गीतिकाव्यम्

4. गद्यकाव्यम्

5. चम्पुकाव्यम्

**पञ्चमोऽध्यायः**- आख्यायिकायाः वैशिष्ठ्यम् समीक्षात्मकमध्ययनम् च

उपसंहारः

**उपसंहारः –**

पूर्वाचार्यैः गद्यपद्यविधायाः ये प्रकाराः भणिताः तेषु आख्यायिका एका प्रमुखा विधा अस्ति। इयं विधा प्राचीनकालात् वर्तमानपर्यन्तम् अक्षुण्णं रूपेण प्रचलिताऽस्ति। अस्याः लोकप्रियतायाः आकलनं पत्रपत्रिकासु प्रकाश्यमानानाम् आख्यायिकानां संख्याभिः कर्तुं शक्यते। अत्र रमणीयशब्देषु सारगर्भितस्य प्रसङ्गस्य चित्रणं क्रियते। वर्तमाने रूचिपूर्णे समये अस्याः प्रचलनं भारतीयसाहित्ये संवर्द्धन्ते। प्रस्तुत-आख्यायिका विश्वस्य समस्तासु भाषासु एकस्मिन् प्रतिष्ठिते स्थाने अस्ति। अस्याः प्रयोगधर्मितायाः शैल्याम् अन्यासु भाषासु प्रचलितानां विधानां प्रयोगः सर्वोपरि आसीत्। वर्तमानभारतीयसाहित्ये अन्यासु भाषासु आख्यायिका प्रचलिता अस्ति। ललितनिबन्धः इति नाम्ना।

सहायकग्रन्थसूची –


• संस्कृत साहित्येर इतिहास- ड: देवकुमार दास,स्वदेश 101वि, विवेकानंद रोड,कलकाता-700006

• ऋग्वेदः, दयानन्दसंस्थान, दिल्ली, 2002

• वाल्मीकिरामायण, सं. रामनारायण दत्त, शास्त्री प्रकाशन, गोरखपुर 2042, वि.सं. 2006

• महाभारत, सं.जी.डी. जालान, गीताप्रेश, गोरखपूर – 2014

• संस्कृतकाव्यशास्त्र और काव्य परम्परा, राधावल्लभ्त्रिपाठी, प्रतिभा प्रकाशन, दिल्ली – 2004

• संस्कृतमहाकाव्योंका समालोचनात्कम अध्ययन, डाँ. रहसबिहारी द्विवेदीन्यूभारतीय बूक कार्पोरेशन, दिल्ली – 2001

• लौकिकसंस्कृतसाहित्य, ए.वी.कीथ, चौखम्बा प्रकाशन, वाराणसी